1

रमातिजन्मदेशरजौरतोच नवि भोजगंदकनाम्ना सम्पस सप्रयुनन्दनादध्यमूर्तिगादोहरा मनन नीजरस्थानि गतम्॥

गारोभाप्र नम्नः॥ अथदीक्षाकालः॥ वैशाखेरत्नलाभः स्याज्ज्येष्ठे तु मरणं भवेत् आषाढे बंधुना
...मृत्युः श्रावणे भवेत् १ प्रजानाशो भवेद्भाद्रे आश्विने रत्नसंचयः कार्त्तिके मंत्रसिद्धिः स्या
र्गशीर्षे तथा भवेत् २ पौषे तु शत्रुपीडा स्यान्माघे मेधाविवर्द्धनम् फाल्गुने सर्वकामाः स्युर्मलमासं विवर्ज...
सौरिमासः शुभा दीक्षा न चन्द्रे न च नारके अथवारनियमः॥ रविवारे भवेद्वित्तं सोमे शांतिर्भवेत्किल ३ आयु
र्हन्ति नक्षत्रदीक्षा च वर्जयेत् बुधे सौन्दर्यमाप्नोति ज्ञानं स्यात्तु बृहस्पतौ ४ शुक्रे सौभाग्यमाप्नोति ९ यशोहानिः
शनैश्चरे अथतिथिनियमः॥ प्रतिपदि कृता दीक्षा ज्ञाननाशकरी मता ५ द्वितीयायां भवेद् ज्ञानं तृतीयायां शुचि
र्भवेत् चतुर्थ्यां धननाशः स्यात्पंचम्यां बुद्धिवर्द्धनम् ६ षष्ठ्यां ज्ञानक्षयः सौख्यं लभते सप्तमीदिने अष्ट
म्यां बुद्धिनाशः स्यान्नवम्यां वपुषः क्षयः ७ दशम्यां राजसौभाग्यमेकादश्यां शुचिर्भवेत् द्वादश्यां सर्वसि
द्धिः स्यात् त्रयोदश्यां दरिद्रता ८ तिर्यग्योनिश्चतुर्दश्यां कृमिर्मासावसानके पक्षान्ते धर्मवृद्धिः स्यात्
स्वाध्यायं विवर्जयेत् ९ अथ नक्षत्रफलम् अश्विन्यां सुखमाप्नोति भरण्यां मरणं ध्रुवम् कृत्तिका
यां भवेद्दुःखी रोहिण्यां वाक्पतिर्भवेत् १० मृगशीर्षे शुभावाप्तिरार्द्रायां बंधुवर्द्धनम् पुनर्वसौ

रौव्रतं परं ॥ प्रशुद्धाधिकायां मध्ये व्यंगरायोगप्रशंसनादिति। चतुर्थ्यपि सर्वमते गणेशव्रतातिरिक्ता परैव। माधवा
रात्रिश्च नात्। एकादशी तथा षष्ठी अमावस्या चतुर्थिका। उपोष्यापरसंयुक्ताः पराः पूर्वेण संयुता इति माधवीये। नागच
व्यापा तुर्थि मध्याह्नव्यापि पंचमीयुता च ग्राह्येति निर्णयामृते माधवीयोक्तम्॥ युग्मवाक्यं दिनद्वये तत्रोपोष्या परा
पंच कालात्। चौरेणाप्राप्य पंचम्यां पूजयेत्प्रयतो नरः। विषाणि तस्य नश्यन्ति न तान् हिंसंति पन्नगा इति माधवीये। तृतीय
दि युक्चतुर्थी पूर्वत्र यमध्याह्नव्याप्तौ पूर्वा। अन्यपक्षेषु परैव। पंचम्या पूजोक्तेः गणेशव्रते तु तृतीयु[illegible]तैव।
तु तृतीयायां मातृव्रतापकलप्रद॥ कर्तव्यानि व्रतानि भिर्वैस्ते गणनायस्य तोषिणीति हेमाद्रौ ब्रह्मवैवर्तात्॥ माधवी
२ तु॥ गणेशव्रते मध्याह्नव्यापिनि मुख्या॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते मध्याह्नव्यापिनी चेत्स्यात् २
परतश्चेत्परेऽहनीति बृहस्पतिवचनात्॥ वस्तुतस्तु। यत्र भाद्रशुक्लचतुर्थ्यादौ गणेशव्रतविशेष मध्याह्न
जोकालत्वेऽपारेपय प्रागुक्तवचनानि ननु सार्वत्रिकाणि। संकष्टचतुर्थ्यादिवह्नीनां कर्मकालान[illegible]यापत्तेः। तेन
सर्वत्र गणेशव्रते पूर्वैवेति सिद्धम्॥ संकष्टचतुर्थी तु चन्द्रोदयव्यापिनी ग्राह्या॥ दिनद्वये तत्त्वे मातृयोगस्य स
त्वात् पूर्वेति केचित्। गौरीव्रते पूर्वैव गणेशगौरी बहुला व्यतिरिक्ताः प्रकीर्तिताः चतुर्थी पंचमी विद्धा इति वतां त
रयोगात् मदनरत्ने ब्रह्मवैवर्तात्। पंचमी तु माधवमते सर्वापि पूर्वा। चतुर्थीसंयुक्ता कार्या पंचमी

2

कनाख्यः स्यात्पुष्ये शत्रुविनाशनम् श्लेषायां भवेन्मृत्युर्मघायां दुःखमोचनम् सौंदर्य्यं पूर्वफाल्गुन्यां प्र
प्रीतिश्च नसंशयः शान्तंचोत्तरफाल्गुन्यां हस्तायांच धनी भवेत् चित्रायां ज्ञानसिद्धिः स्यात्स्वात्यां शत्रुविना
शनम् विशाखायां सुखंचानुराधायां बंधुवर्द्धनम् ज्येष्ठायां सुतहानिः स्यान्मूलायां कीर्त्तिवर्द्धनम् पूर्वाषाढो
त्तराषाढे भवेतां कीर्त्तिदायिके श्रवणायां भवेद्दुःखी धनिष्ठायां दरिद्रता वृद्धिः शतभिषायां स्यात्पूर्वभाद्रे सुखी
भवेत् सौख्यंचोत्तरभाद्रे च रेवत्यां कीर्त्तिवर्द्धनम् अथयोगनिर्णयः शुभः सिद्धिश्चायुष्मान् ध्रुवयोगस्ततः
परम् प्रीतिः सौभाग्ययोगश्च वृद्धियोगस्ततः परम् हर्षणाश्च तथा योगाः सर्वते त्रेसुखावहाः अथल
ग्ननिर्णयः वृषेसिंहे च कन्यायां धनुर्मीनाख्यलग्नके चंद्रतारानुकूलेच कुर्याद्दीक्षाप्रवर्तनम् शुक्ले अथ
शुभाद्दीक्षा कृष्णपक्षे पंचमादिनात् अथप्रतिपदादिनिर्णयः शुक्लप्रतिपद [illegible] परा ह्रस्वव्यापित्वे पूर्वामावास्यायाः सर्वथा नि
षेधात् प्रतिपत्संमुखी कार्य्या यो भवेदापराह्णिकी इति स्कंदोक्तेः द्वितीयातु कृष्णा पूर्वा शुक्लोत्तरेति [illegible] द्धिः स्याद
कृष्णा द्वितीयादि परा तथाच माधवः पूर्वेद्युः सती प्रातः परेद्युस्त्रिमुहूर्त्तगा ॥ सा द्वितीया परा ज्ञेया पूर्वविद्धा [illegible] त्रिका
ल्प्याति । तृतीयातु रंभाख्यवर्जिता परैव ॥ तेन युग्मवाक्यम् रंभाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम अन्य
र्वकार्य्येषु गणयुक्तां प्रशस्यते [illegible] मुहूर्त्तमात्रसत्वेपि

रात्रिमहोत्सवे। इति माधवोक्तेः। दिवोदासीये भविष्ये। यदा पक्षे सिताष्टम्यां बुधवारो भवेत् क्वचित्। तदा तद्दहिंसा
व्यासार्कभक्ताशनेन पासं ध्याकालेति पाचेत्रे प्रसुप्ते च जनार्दने॥ बुधाष्टमी न कर्तव्या हन्ति पुण्यं पुराकृतम्। अत्र ३
पक्षे हेमाद्रौ धृतम्। नवमी तु सर्वमते पूर्वा पुमवाक्यात्। न कुर्यान्नवमी तात दशम्यां तु कदाचनेति स्कान्दात्। दशमी पूर्वा पर
चेति हेमाद्रौ॥ कृस्नापूर्वेन राधशुक्लादशम्येवं व्यवस्थितेति माधवः। वस्तुतस्तु मुख्या नवमी युता वैध्याह्या। दशमी तु प्र
कर्तव्या सदुर्गा द्विजसत्तमेत्यापस्तंबोक्तेः। पन्तु। संपूर्णा दशमी कार्या पूर्वया परयाथवा पराग्नि दशोमष्ट। तन्नवमीयुताल
भे श्रेष्ठ कीर्त्याहेति निर्णयः॥ अथैकादशी। तत्रैकादश्युपवासो द्वेधा। उदयात्प्राक् चतस्रस्तु नाडिका अरुणोदयः। ना
डिकादंडः। स्कान्दे॥ दशम्यैकादशी विद्धा गांधारी तामुपोषिता। तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत्। येकारयंति
कुर्वन्ति दशम्यैकादशीयुताम्॥ अलोम्नस्तन्मुखं वृजन् सूर्यदर्शनमाचरेत्। कांश्यं मांसं मसूरांश्च चणकं कोरदूषकान्
शाकं मधु परान्नं त्यजेदुपवसन् स्त्रियं तपा। शाकं मांसं मसूरांश्च पुनर्भोजनमैथुनं। द्यूतमत्यम्बुपानं च दशम्यां वैष्णवस्त्य
जेत्। एकादशीमुपवसेद्द्वादशीमथवा पुनः। विमिश्रं वापि कुर्वीत न दशम्यायुतां क्वचित्॥ कुर्यादलाभे संयुक्तं
नालाभेपि प्रवेशिनीम्। उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणम्। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। तत्र क्रतुश
तं पुण्यं त्रयोदश्यां तु पारणे। पन्तु। द्वादश्यां द्वादशीं हंति त्रयोदश्यां तु पारणामिति। तदुपवासपरदिने द्वादशी लाभेन तं विहाय पारणं

3

परयायुता। दैवे कर्म्मणि पित्र्ये च शुक्लपक्षे तथासिते इति हारीतोक्तेः॥ हेमाद्रिमते तु कृष्णापूर्वाः शिताः पराः।
कृष्णापूर्वयुता शितापरयुतास्या पंचमी तिथ्योपिकोक्तेः वस्तुतस्तु हारीतोक्तिरुपवासविषया। प्रतिपत्पंच
मी चैव सावित्री भूतपूर्णिमा नवमी दशमी चैव नोपोष्याः परयायुता इति ब्रह्मवैवर्तात्॥ यत्तु पंचैवु प्रकर्तव्याष
ष्ठ्यायुता तु नारद त्यापसर्वोपं त स्कन्दव्रतपरम्॥ स्कन्दोपवासे षष्ठी कार्या पंचमीपरसंयुतेति वा [illegible] शेषादिति
माधवः। नागपूजाविषयमिति। अनंतभट्टनिर्णयामृतादपः। पंचमी नागपूजायां कार्या षष्ठी समन्विता। श्रावणे
पंचमी शुक्ला संप्रोक्ता नागपंचमी। तां परित्यज्य पंचम्यश्चतुर्थी सहिता हिता। गरोश्च स्कन्दयोगाभ्यां क्रमान्नागः
शुभाशुभः। मित्रामित्रे नयोः पत्रे नागानां मारण्यु [illegible] विनिषट्त्रिंशन्मता त्रे॥ श्रावणापंचम्यातिरिक्तायाः
पंचम्याः स चतुर्थी युतत्वमुक्तम्। तदुपवासविषयम्। षष्ठी स्कन्दव्रते। अतिरिक्तापरे व युग्मवाक्यात्। नाग
विद्धा न कर्तव्या षष्ठी चैव कदाचन। षष्ठी च सप्तमी चैव वारश्चेदंशुमालिनः। योगोऽयं पद्मको नाम सूर्यको
टि [illegible] समः॥ सप्तमी पूर्वैव। युग्मवाक्यात्। षष्ठ्यायुता सप्तमी च कर्त्तव्या तात सर्वदेति स्कन्दाच्च। अष्टमी तु
सर्वमते कृष्णापूर्वा शितापरा व्रतमात्रे। अष्टमी कृष्णा पूर्वा शुक्लाष्टमी परेति माधवोक्तेः। परयुक् शुक्लाष्टमी पर
पूर्वयुक् शुक्लाष्टमी पूर्वयुक् कृष्णेति दीपिकोक्तेश्च॥ शिवशक्त्युत्सवे तु कृष्णा प्युत्तरा। पत्नम्पूर्वेव॥ शिवे

रागे दैवतमश्लेषामस्तकोम्‌गशिरः॥ चैत्रशुक्ले नवमी पुनर्वसुयुक्ता यदि॥ सैव मध्याह्नयोगेन महापुण्यफलप्रदा॥ तथा
चैत्रमासे नवम्यां तु जातो रामः स्वयं हरिः॥ पुनर्वसु ऋक्षसंयुक्ता सा तिथिः सर्वकामदा॥ श्रीरामनवमी प्रोक्ता कोटि
सूर्यग्रहाधिका॥ तथा केवलापि सदोपोष्या नवमी शर्वसंग्रहात्। तस्मात्सर्वात्मना सर्वैः कार्य्यं वै नवमीव्रतम्॥ पूर्वे
पुरवेर्मध्याह्नयोगे कर्मकालव्याप्तेः सैव ग्राह्या दिनद्वये मध्याह्नव्याप्तौ तदभावे वा पूर्वदिने पुनर्वस्वृक्षयुक्तामपि
त्यक्त्वा परैव कार्य्या। तदुक्तं माधवीये अगस्त्यसंहितायाम्॥ नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः। उपोषणं
नवम्यां च दशम्यां चैव पारणमिति। अष्टमीविद्धा सर्वथापि नोपोष्येति माधवः। रामार्चनचन्द्रिकायामपि चैत्रे शुक्ला
व्रतं तत्र कथं भवेत्॥ विद्धा निषेधश्रवणान्नवमी चेति वा भवेत्॥ वैष्णवानां विशेषात्तु तत्र विष्णुपरैरपि। दशम्यादि
युक्ता श्रेष्ठा आत्माज्यैर्वैष्णवैः। तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चितमिति। अत्र दशम्यादियुक्ताश्रेष्ठेति तदन्येषा
मिति च वदता यत्प्रातस्त्रिमुहूर्त्ता नवमी दशमी च तत्पर्वसमाप्तिर्यदि यात्रा कृत्वा समाप्यते। तदा स्मार्त्तानां
तत्रैव एकादशीनिमित्तं न च नवमीव्रतं गपारणास्या लोपः स्यात्। अतोऽष्टमीविद्धैव स्मार्त्तैः कार्य्या। वैष्णवानां तु
रामादशमीविद्धैव कार्या उपवासे त्वन्नपारणालोपप्रसंगश्च इति द्विती येव तैः कार्य्येति सम्प्रति॥ दशमी वृद्ध्यभावेऽष्टमी
वा एवं मध्याह्नव्यापित्वे तयोश्च वैष्णवैरपि। विद्धैव नवमी कार्या परा विद्धा ॥ मिश्रं केचित्प्रागपरा दशम्यादिकाः पुराण
4

महाहानिकरी ह्येषा द्वादशी लंघिता नरैः। करोति धर्म्महरणमस्नातेव सरस्वती ९

वोध्यं तथा च ब्रह्मपुराणम्। एकादश्यामुपोष्यैव द्वादश्यां पारणं स्मृतम्। त्रयोदश्यां न तत्कुर्याद् द्वादशी द्वादशी तत्र ॥ पितृवा
सरादौ। वाराहपुराणे। उपवासोपदा नित्यः श्राद्धं नैमित्तिकं भवेत्। उपवासं तदा कुर्याद् आघ्राय पितृसेवितम्। हेमाद्रौ वशिष्ठः॥
उपवासेन या श्राद्धे न कुर्याद् दन्तधावनम्। दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम्॥ बहुवाक्य विरोधेन संदेहो जायते यदा।
द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पारणम्॥ स्कन्देपि। अष्टैतान्यव्रतघ्नानि आपो मूलं फलं पयः। हविर्ब्राह्मणकाम्या च गुरो
र्वचनमौषधम्। वायुपुराणे च। आभाकासितपक्षेषु मैत्रश्रवणरेवती संगमे न हि भोक्तव्यं द्वादश्यां द्वादशीं हरेत्॥ मैत्राद्यपादे
स्वपिति हि विष्णुः योषान्त्यपादे प्रतिबोधमेति। श्रुतेश्च मध्ये परिवर्त्तनं च सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यम्। द्वादशी तु प्र
कर्त्तव्या एकादश्या युता प्रभो इति स्कन्दाच्च। त्रयोदशी तु सर्वमते शुक्ला पूर्वा कृष्णोत्तरा। त्रयोदशीति थिः। पूर्वः सितोऽप्य
सितः पश्चादिति दीपिकोक्तेः शुक्लत्रयोदशी पूर्वापरा कृष्णा त्रयोदशीति माधवाच्च। चतुर्दशी तु सर्वमते कृष्णा पूर्वा शुक्लोत्तरा
॥ उपवासेष्वपि पूर्वैव मदनरत्ने॥ पौर्णमास्यमावस्येति सावित्रीव्रतं विनापरे ग्राह्ये। भूतविद्धे न कर्त्तव्ये दर्शपूर्णे कदाचन
वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति। अमावास्यां योगविशेषमाह। अमावास्या सोमवारे रविवारे रासमन्मथो। चतुर्थी भौम
वारे गाविषुव सदृशं फलम्। तत्र व्यासः। सिनीवाली कुहूर्वापि यदि सोमदिने भवेत्। गोसहस्रफलं दद्यात् स्नानं वै मौनि
कं भवे। हेमाद्रौ वृहन्मनुः। श्रवणाश्विधनिष्ठार्द्रा नागदैवतमस्तकोपद्यमा रविः। वारेण व्यतीपातः स उच्यते

लटधेनुपूजा दुर्गा च मंदुर्भरहोलिका च। वत्सस्य पूर्णा शिवरात्रिरेताः परान्विता ग्राह्यान्तिन्नपंसराद्धुमिति दिवोदा
सीप[illegible]वचनात्। धेनुपूजाशब्देन बहुला व्याख्यायते॥ अथ भाद्रकृष्णाष्टमी जन्माष्टमी। तथा नाद्रपदे मासि
कृष्णाष्टम्यां कलौ युगे॥ अष्टाविंशतिमे जातः कृष्णो वै देवकीसुत इति कल्पतरौ ब्राह्म्योक्तेः। अत्रेदं माधवमतम्
। अष्टमी द्वेधा। जन्माष्टमी जयंती चेति। तत्राद्यामेकेष्वाष्टमीं येन कुर्वन्ति जानंतः कृष्णजन्माष्टमीव्रतम्
। ते भवंति नराः प्राप्तेश्यालाव्याघ्राश्च कानने निस्फुन्दात्॥ दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीक
५ ला। रात्रियुक्तां प्रकुर्वीत विशेषेनेति संयुता पुराणान्तरात्॥ श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम् ५
॥ न करोति नरो यस्तु भवेति क्रूरराक्षस इति भविष्योक्तेश्च। कृष्णाष्टम्या एव योगमात्रावगतेः। सैव रोहिणीयु
क्ता जयंती। कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि। जयंती नाम सा प्रोक्ता उपोष्या सा प्रयत्नत इति वा
पुराणात्॥ रोहिणीयोगश्चाहोरात्रे मुख्यः निशीथमात्रे मध्यमः दिवसादावधमः॥ अहोरात्रं तयोर्यो
गो ह्यसंपूर्णो भवेद्यदि। मुहूर्त्तमप्यहोरात्रे योगश्चेत्तामुपोषयेदिति वशिष्ठसंहितोक्तेः अर्द्धरात्रे
तु योगोऽयं तारापत्युदये सति। नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्त्तयेदिति विष्णु

रात्रौ तु प्राग्युक्तम् । वैशाखशुक्लतृतीयायां परशुरामजयन्ती सा प्रदोषव्यापिनि ग्राह्या । तदुक्तं । वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ । निशायाः प्रथमे यामे रामाख्यः समये हरिः । दिनद्वये व्याप्त्यव्याप्तौ वशात् शामव्याप्तौ च परा । अन्यथा पूर्वैव तदुक्तं । शुक्लात्तृतीया कथायां वैशाखे शुद्धा पोष्या दिनद्वये । निशायाः पूर्वयामे चेदुत्तरान्यत्र पूर्विके ति ॥ ज्येष्ठशुक्लदशमी दशहरा ॥ ज्येष्ठमासि सिते पक्षे दशमी हस्तसंयुता हरते दश पापानि तस्माद्दशहरा स्मृता ॥ अथ नदीनां रजोदोषः ॥ सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ॥ न स्नानादीनि कर्माणि तासु कुर्वीत मानवः । इदं च तुद्र नदी[illegible]षु ॥ सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः । तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाम् । इति व्याघ्रोक्तेः ॥ अथ सिंहसंक्रान्तौ गोप्रसवनिषिद्धः । भानौ सिंहगते चैव यस्य गौः संप्रसूयते ॥ मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः । तत्र शान्तिं प्रवक्ष्यामि येन संपद्यते शुभम् ॥ प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् । ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः ॥ मध्ये रात्रेर्निशीथे वा यस्य गौः क्रन्दते यदा ॥ ग्रामे वा यस्य गेहे वा पि शान्तिं पूर्ववदाचरेत् ॥ एवं श्रावणे वडवा प्रसवो दिवा निषिद्धः । तदुक्तं । माघे बुधे च महिषी श्रावणे वडवा दिवा । सिंहे गावः प्रसूयन्ते स्वामिनो मृत्युदायकाः । श्रावणे वडवा चाश्विने मकरे महिषी निशि । प्रसूता वा शुभा धेनुः सिंहसंक्रान्तिवासरे । भाद्रकृष्णचतुर्थी बहुलाख्या माध्यदेशे प्रसिद्धा । तत्र गोव्यापिनी ग्राह्या । दिनद्वये सत्त्वे पूर्वा ॥ गोष्पाद्रतुर्थी

६

[illegible]स्यात्पुराकृतं कर्म उपवासार्जितं फलं॥ तिथिरष्टगुणां हन्ति नक्षत्रं च चतुर्गुणाम्। तस्मात्प्रयत्नतः कुर्यात्तिथिभांते
तु पारणाम्। अत्रोभयवियोगे पारणामुक्तम्। यदा सार्द्धप्रहरनिशाभ्यन्तरे एकस्यैव वियोगः तदाप्येकतरवि
योगेऽपि पारणाम्॥ तथा च नारदीये। तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्। पारणां तु न कर्त्तव्यं यावन्नैक
स्य संक्षयः। संयोगे केवले प्राप्ते यस्यैकोऽपि वियुज्यते। तदैव पारणां कुर्यादेवं वेदविदो विदुः॥ मुख्यः तिथिभां
ते च पारणाम्। कर्त्तव्यम्। ॥ ॐ॥ अथ रात्रिसूक्तम्॥ ॐ रात्रिः कुशिकः सौरभो रात्रिर्वा भारद्वाजी रात्रिस्तवो गायत्रम्
॥ ॐ रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः। विश्वा अधि श्रियोऽधित॥१॥ ओर्वप्रा अमर्त्या निवतो देव्युद्वतः॥ ज्यो
तिषा बाधते तमः॥२॥ निरु स्वसारमस्कृतोषसं देव्यायती॥ अपेदु हासते तमः॥३॥ सा नो अद्य यस्या वयं
नि ते यामन्नविक्ष्महि॥ वृक्षे न वसतिं वयः॥४॥ नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः॥ नि श्ये
नासश्चिदर्थिनः॥५॥ यावया वृक्यं वृकं यवय स्तेनमूर्म्ये॥ अथा नः सुतरा भव॥६॥ उप मा पेपिशत्तमः कृष्णं
व्यक्तमस्थित उष ऋणेव यातय॥७॥ उप ते गा इवाकरं वृणीष्व दुहितर्दिवः॥ रात्रि स्तोमं न जिग्युषे।८॥ आ रात्रि
पार्थिवं रजः पितुरप्रायि धामभिः॥ दिवः सदांसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः।९॥ ये ते रात्रि नृच ६

6

धर्मोक्तेः। वासरे वा निशायां वा यत्र स्वल्पापि रोहिणी। विशेषेण न भोमासे सैवोपोष्या मनीषिभिरिति पुरा
णांतराच्च। गौडास्तु। नि। शीथस्वरोहिणीयोगे जयंती नामतां न्यथेत्याहुः। तन्न। यद्यपि द्विर्यामद्विधारा
त्रौनास्ति चेद्रोहिणी कला रात्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयुतामित्यनेन रोहिणीयोगाभावेऽर्द्ध
रात्रव्याप्तिरुक्तेति। यस्मिन्वर्षे जयंतीयोगो नास्ति तत्र जयंतीव्रतलोपप्राप्तेऽष्टमीमात्रेऽपि जयंती व्रतं
कार्यमिति। एवं परमिदमिति तदापि शेषवचनं प्रोक्तं जयंती नाम शार्वरीति। पद्मपुराणे उदये चाष्टमी किं
चिन्नवमी सकला यदि। भवेद्बुधसंयुक्ता प्राजापत्यर्क्षसंयुता॥ अपि वर्षशतेनापि लभ्यते वा यदि वेति।
यच्च। अर्द्धरात्रे तु रोहिणी यदा कृष्णाष्टमी भवेत्। तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजमिति भविष्योक्तेः
॥ अष्टमी रोहिणीयुक्ता निश्यर्द्धे दृश्यते यदि। मुख्यकालः स विज्ञेयस्तत्र जातो हरिः स्वयम्। रोहिणीसहिता
कृष्णा मासि भाद्रपदेऽष्टमी। सप्तम्यामर्द्धरात्राऽधः कलयापि यदा भवेत्। तत्र जातो जगन्नाथः कौस्तुभी हरि
रीश्वरः। तमेवोपवसेत्कालं कुर्यात्तत्रापि जागरणम्॥ विनाऋ[illegible]क्षेत्तु कर्त्तव्या नवमी संयुताष्टमी। यदि
[illegible]ग्नारणाच्च। माधवाचार्यप्रभृतयस्तु। पारणकालश्च॥ अष्टम्यामथ रोहिण्यां न कुर्यात्पारणां क्वचित्

अत्राप्ययाम[illegible] मुपैति सूर्यस्तिथिं मुहूर्त्तत्रयवाहिनी च। धर्मस्य कृत्येष्वखिलेषु पूर्णां वदंति तां कालविदः पुरा
यो २

विप्रवातामूर्ध्वांविष्णोर्गोपस्थ्यामि॥७॥अहमेववातइव प्रवाम्यारभमाना भुवनानिविश्वा। परोदिवापरएना

पृथिव्यैतावतीमहितासंबभूव॥८॥इतिदेवीसूक्तम्॥ भाद्रशुक्लतृतीयायां हरितालिकाव्रतम्। तत्रपराग्राह्या।

मुहूर्तमात्रसत्वेपिदिनंगौरीव्रतंपरे। शुद्धाधिकायामप्येवं गणयोगप्रशंसनादितिमाधवोक्तेः। आद्या

मधुश्रावणी लोककज्जली हरितालिका॥ चतुर्थी मिश्रिता जीर्णि(?)र्द्वितीयाकेविधीयते। तृतीयानभसःशुक्ला

मधुश्रावणीकास्मृता॥ भाद्रस्यकज्जलीकृष्णा शुक्लाचहरितालिकेति। भाद्रशुक्लचतुर्थ्यांचंद्रदर्शनंनि

षिद्धम्। सिंहादित्येशुक्लपक्षे चतुर्थ्यांचन्द्रदर्शनम्॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्नतंसदे

ति॥ चतुर्थीनपश्येदित्यन्वयः। प्रधानक्रियान्वयलाभात्। तेनचतुर्थीमुदितस्यपंचम्यांननिषेधः। पराश

रोपि। कन्यादित्येचतुर्थ्यांतुशुक्लेचन्द्रस्यदर्शनम्। मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्नतंसदा॥

तद्दोषशांतये॥ सिंहः प्रसेनमवधीत्सिंहो जाम्बवताहतः॥ सुकुमारकमारोदीस्तवह्येषः स्यमन्तकः॥

भाद्रशुक्लपंचमीऋषिपंचमी। तामध्याह्नव्यापिनीग्राह्या। पूजाव्रतेषुसर्वेषु मध्याह्नव्यापिनी

तिथिरिति माधवीयेहारीतोक्तेः। दिनद्वयेतत्त्वेहेमाद्रिमतेपरा। सितापरयुताहिस्यात्पंचमीति

7

नैषो पुत्रकासो न यन्ति नैव ॥ आशीतिसंख्या उक्तते सप्रसप्ततिः ॥१०॥ रात्रीं प्रपद्ये जननीं सर्वभूतनिवेशिनीम् ॥ भद्रां भगवतीं कृष्णां विश्वस्य जगतो निशाम् ॥११॥ संवेशनीं संयमनीं ग्रहनक्षत्रमालिनीम् । प्रपन्नोहं शिवां रात्रीं भद्रे पारमशीमहि ॥१२॥ कालरात्र्यै नमः । तालरात्र्यै नमः । शिवरात्र्यै नमः ॥ परापरात्र्यै नमः ॥ ॥ इति रात्रिसूक्तम् ॥ अथ देवीसूक्तम् ॥ ॐ अहमद्य वाग्गाम्भिनी तुष्टा वाक्यानं छितीयाजगती । ॐ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥१॥ अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् । अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते ॥२॥ अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् । तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ॥३॥ मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ॥ अमन्तवो मां त उपक्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥४॥ अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ॥ यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥५॥ अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ । अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश ॥६॥ अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्वन्तः समुद्रे । ततो वि तिष्ठे भुवनानि

पूर्वावापरविद्धावाग्ग्रासाचन्द्रोदयेसंभवेदा। त्रिमुहूर्त्तापिसापूज्यापरतोर्द्धगामिनीति॥ अथाश्विनशुक्ल
प्रतिपदिनवरात्रारंभस्तन्निरीग्रः॥ शुद्धेति। पौप्रकर्त्तव्यंप्रतिपद्यत्रोर्द्धगामिनीति॥ आद्यास्तुनाडिकास्त्यक्त्वा
षोडशद्वादशापिवा। अपराह्णेचकर्त्तव्यंशुद्धसंततिकांक्षिभिः। इदंचापराह्णयोगिन्याःप्रशस्तद्वितीयदिनेप्र
तिपदोभावेज्ञेयम्। देवीवचनेः। अमायुक्तानकर्त्तव्याप्रतिपत्पूजनेमम। मुहूर्त्तमात्राकर्त्तव्याद्वितीयादिगुणा
न्विता॥ आद्याः षोडशनाडीस्तुलब्ध्वायःकुरुतेनरः। कलशस्थापनंतत्र ह्यरिष्टंजायतेध्रुवम्। पूर्वविद्धातु
८ याशुक्लाभवेत्प्रतिपदाश्विनी॥ नवरात्रंव्रतंतत्र अमायांनकार्यंशुभमिच्छता। देशभंगोभवेत्तत्रदुर्भिक्षंचोप ८
जायते। नंदायांदर्शयुक्तायांयत्रस्यान्ममपूजनम्। यद्विकुर्यादमायुक्तःप्रतिपत्स्थापनंमम। तस्य
शापायुतंदत्वा भस्मशेषंकरोम्यहम्। नदर्शकलयायुक्ताप्रतिपच्चंडिकार्चने॥ उदयेद्विमुहूर्त्तापि
ग्राह्यासोदयगामिनी॥ देवीपूजनंशुक्लात्तारावपिकार्य्यम्। नष्टेशुक्रेतथाजीवे सिंहस्थेचबृहस्पतौ
। कार्य्याचैवस्वदेव्यस्यापूजास्वकुलधर्मतः॥ ॥अथाशौचेविशेषोनिरीग्रः॥ आश्विनेशुक्लपक्षेतुप्रा
रब्धेनवरात्रके। आशौचेसमुत्पन्ने क्रियाकार्याकथंनृपे। (सूतकेवर्त्तमानेऽपिच तत्रोत्पन्नेस

8

अप्राप्ते भास्करे कन्यां शेषभूते त्रिभिर्दिनैः अर्बुदे पुरुगत्स्याय मध्यदेशनिवासिनः ।१॥ अप्राप्ते भास्करे कन्यां शेषस्तप्रदिनेभुवे। अर्बुदे पुरुग
त्स्याय गौडदेशनिवासिनः ।२ पंचानन गते सूर्ये सप्तविंशतिवासरे । अगस्त्याय प्रदानेन प्रीता देवा भवंति हि ३॥ कन्याया मागते
सूर्ये सिंहशेषे दिनत्रये अगस्त्याय जलं दद्यात् कुलकोटिं समुद्धरेत् ४
दीपिकोक्तेः ।मा चन्द्रमनेपूर्वा। सर्वत्र पंचमी पूर्वा युः। ऋषिपंचमी षष्ठीयुतैवेति दिवोदासः। युग्मवाक्यान्निर्णयः सुधु
क्तेः। भाद्रशुक्लद्वादश्यां श्रवणायोगरहितायां पारणां कुर्यात्। विशेषेण महीपाल श्रवणे द्वादशी यदि॥ तिथि
नक्षत्रेन भोक्तव्यं द्वादशीं लंघयेन्न हीति। यदा त्वपरिहार्यो योगस्तदा श्रवणा नक्षत्रे धा विभक्ते मध्यमं विंशतिघ
टिकायोगं त्यक्त्वा पारणां कार्यम्। केचिच्चतुर्धा विभज्य मध्यमं पादद्वयं वर्ज्यमाहुः ॥ अथ भाद्रशुक्लचतु
र्दश्यामनंतव्रतम्॥ तत्र त्रिमुहूर्त्ताप्योदयिकी ग्राह्येति माधवः। तदुक्तम्। उदये त्रिमुहूर्त्तापि ग्राह्यानंतव्र
ते तिथिरिति। मध्याह्ने भोज्यवेलायां मिति कथायां श्रवणाद्युपारहिदेवेभ्यो धारयती निचवि कल्पनात्पू
कम्। तथा भाद्रपदस्यांते चतुर्दश्यां द्विजोत्तम। पौर्णमास्याः समायोगे व्रतं चानंतकं चरेत्। इति भविष्योक्तेः॥
मुहूर्तमपि चेन्मासि भाद्रे पूर्णा माघा चतुर्दशी॥ संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययमिति ॥ अत्र मूलं चिं
त्यं॥ इह औदयिकत्वे पूर्णत्वात्पूर्वेति युक्तम्॥ अथ आश्विन कृष्णाष्टम्यां महालक्ष्मीव्रतम्। इदं चंद्रोदय
व्यापिनी ग्राह्या॥ तत्रैव पूजायुक्तेः। परदिने चन्द्रोदया [illegible] व्यापिवे परैव कार्या। अन्यथा पूर्वैव॥

वीषाढ्युताष्टम्यां पूजा होमाद्युपोषणम्॥ उत्तरेणान्वयम्यांतु बलिभिः पूजयेच्छिवम्॥ अपराह्णे दशम्यांतु प्रशाप
त्य विसर्जनम्। बोधयेद्बिल्वशाखायां षष्ठ्यां देवीफलेषु च॥ सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत्। पुनः पूजां
तथाष्टम्यां विशेषेण समाचरेत्। जागरं च स्वयं कुर्याद्बलिदानं महानिशि। प्रभूतबलिदानं तु नवम्यां विधिवच्च
रेत्। विसर्जनं दशम्यां तु कुर्याद्वैभवोत्सवैः॥ अत्र सर्वत्र तिथिभिन्न नक्षत्रयोगादरो मुख्यकालः॥ तदभावे तु तिथि
रेव ग्राह्या। तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितम्॥ तस्मात्तिथिं प्रशंसन्ति नक्षत्रं न तिथिं विना इति॥ तिथि
नक्षत्रयोर्योगे द्वयोरेवानुपालनम्। योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि॥ तत्र बोधप्रवेशात्पूर्वेद्युः
सायंकाले षष्ठ्यभावे तत्पूर्वदिने अधिवासनं कार्यं सायंकाले षष्ठ्यंतासत्त्वे अधिवासलोपः॥ षष्ठ्यां सायं प्रकुर्वीत बि
ल्ववृक्षे अधिवासनमिति॥ मूलाभावे तु सप्तम्यां केवलायां प्रवेशनम्॥ युग्माभ्यां नवबिल्वस्य फलाभ्यां साखि ८
कांतया॥ अत्र बोधवासपूजादौ पिकी सप्तमी ग्राह्या। ननु युग्मवाक्यात्पूर्वा। युग्माद्यावर्षवृद्धिश्च सप्तमी
पार्वती प्रिया॥ रवेरुदयमीक्षंते न तत्र तिथियुग्मतेति॥ भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः।
तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुधः॥ व्रतोपवासनियमे घटिकैकापि या भवेदिति दिवलोकेरितिगौडाः॥ पत्रिका
सु॥ रंभा केवी हरिद्रा च जयंती बिल्वदाडिमौ॥ अशोकमानकश्चैव धान्यादि नवपत्रिका॥ अथ मूर्तिस्थापने

ति० ८

दा बुधैः। देवीपूजाप्रकर्तव्या पशुयज्ञविधानतः। पूर्वसंकल्पितं यच्च व्रतं सुनिपुणं व्रत॥ कर्तव्यं नरैः शुद्धं दाना
चेन विवर्जितमिति॥ आश्विन कृष्णनवम्यादि शुक्लप्रतिपदादि षष्ठ्यादि सप्तम्यादि चैकं कर्म अत्र स्वमध्ये आ
शौचपातेन दोषः। संकल्पो व्रतसत्रयोरिति विष्णू क्ते आरब्धं स्वयमेव कार्य्यं। अनारब्धे त्वन्येन कारयेदिति
दिवोदासः॥ रजस्वला त्वन्येन कारयेत्। सूतकादिव द्विशोषव चनाभावात्॥ स्त्रीरां॥ चनवरात्रे ताम्बूलादिचर्व
र्णा भवति। गंधोऽलंकारस्ताम्बूल पुष्पमाला नेपनम्। उपवासे न दुष्यंति दंतधावन मंजनमिति एतत्सभ
र्तृकोपवासविषयम्। आश्विनशुक्ल पक्षे मूलनक्षत्रे सरस्वती स्थापनं यथोक्तं निर्णयामृते देवीपुरा
णे॥ मूलेषु स्थापनं देव्याः पूर्वाषाढ सुपूजनम्। उत्तरासु बलिं दद्यात् श्रवणेन विसर्जयेत्। मूल ऋक्षे
सुराधीशा पूजनीया सरस्वती। पूजयेत् प्रत्यहं देवि यावद्वैसव मत्तकम्। नाध्यापये न्न च लिखे न्नाधी
यति कदाचन। पुस्तके स्थापिते देव विद्याकामो द्विजोत्तमः। मूलाद्यपादे आवाहनमिति शिष्टाः
आद्यभागो निशायां तु श्रवणास्य पदा भवेत्। संप्रेषणं तदा देव्याः दशम्यां च महोत्सव इति॥ अथ षष्ठी॥
पेणानक्षत्र पुजायां ...श्यां ... ... ॥ ... ...पाः प्रवेशनम्॥

तुः

र्घनाशिनि। प्रादुर्भूता महाघोरा योगिनी कोटिभिः सह॥ महाष्टम्यां आश्विने मासि शुक्ले कल्याणदायिनी। सप्तम्यापि युता

॥ र्व्या मूले न तु विशेषतः। तानि परदिने ऽष्टम्यभावविषयाणि। तथैव परदिने ऽष्टमी सत्वेपि पूर्वविद्धा

॥ वेधापरकं वचनम्। यदा तु अष्टमीं संप्राप्य अस्तं याति दिवाकरः। तत्र दुर्गोत्सवं कुर्य्यात् न कार्य्या दपरे ऽहनि दुर्भिक्षं

तत्र जानीयान्नवम्यां यत्र पूज्यते। इति। तत्परदिने दशम्यां नवम्याभावविषयम्॥ यदा सूर्य्योदये नस्यान्नव

मी चापरे ऽहनि। तदाष्टमीं प्रकुर्वीत सप्तम्या सहितां न्यपेति। उत्तराषाढयोः यत्र त्सर्पयाति नराधिप। पूर्वाष्टमीं तदा

१० कुर्य्यादन्यथा त्वशुभं भवेत्। वस्तुतस्तु। इदं वचनद्वयम्। अष्टमीनवम्योः सूर्य्योदयद्वयासंबंधपरम्। अ १०

न्यथा पूर्वोक्तविरोधादिति दिक्। यत्तु। अहं भद्रा च भद्राहं नावयोरंतरं क्वचित्॥ सर्वसिद्धिप्रदास्यामि भ

द्रायामर्चिता सहमिति। अथ विशेषः। आश्वयुक्शुक्लपक्षस्य अष्टमी मूलसंयुता॥ सा महानवमी

नाम त्रैलोक्येपि सुदुर्लभा। अथ महानवमी। महानवमी तु पूर्वविद्धा ग्राह्या। पूर्वोक्तवचनात्। नवमी दु

र्गाव्रते। श्रावणी दुर्गनवमी दूर्वा चैव हुताशिनी। पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनमिति। आ

श्वयुक्शुक्लपक्षे तु अष्टमी मूलसंयुता। सा महानवमी प्रोक्ता त्रैलोक्येपि सुदुर्लभेति। तथा। आश्वि

10

॰विशेषः देवीपुराणे ॥ याम्या साशुभदा दुर्गा पूर्वास्या जयवर्द्धिनी । पश्चिमाभिमुखी नित्यं न स्थाप्या सौम्या
मुखी । प्रतिमाभावे विशेषस्तत्रैव । खड्गे शूलेऽर्चिता देवी सर्वकामफलप्रदा ॥ यच्च यस्यायुधं प्रोक्तं तस्मिं वा
स्तां प्रतिपूजयेत् ॥ ॥अथ महाष्टमी॥ सा च परयुता । शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ॥ पूर्वविद्धा न
कर्त्तव्या कर्त्तव्या परसंयुतेति ॥ शरन्महाष्टमी पूज्या नवमी संयुता सदा । सप्तमी संयुता नित्यं शोकसंतापकारिणी ॥
जंभेन सप्तमी युक्ता पूजिता तु महाष्टमी । इन्द्रेणाभिहतो जंभस्तस्माद्दानवपुंगवः ॥ तस्मात्सर्वप्रयत्नेन सप्तमी
मिश्रिताष्टमी ॥ वर्जनीया प्रयत्नेन मनुजैः शुभकांक्षिभिः ॥ तथा । पुत्रान्हंति पशून्हन्ति हन्ति राष्ट्रं सराज
कम् । हंति जातानजातांश्च सप्तमीसहिताष्टमी ॥ तेन नात्र त्रिमुहूर्त्तवेधः ॥ तदा । यदि कामात्रापोदयि
की ग्राह्या । इयं भौमेऽतिप्रशस्ता ॥ अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत् ॥ कुजवारो भवेच्चैत्र पूज
नीया प्रयत्नतः । इयमेव मूलयुता चेन्महाष्टमी संज्ञा यानितु ॥ भद्रायां भद्रकाल्यां स्व मध्ये स्पाद्वेन
त्रिपा ॥ तस्माद्वै सप्तमी विद्धा कार्या दुर्गाष्टमी तु धैरिति । यत्तु । मोहकल्पान्तरे ॥ आश्विनस्यासिताष्ट
म्यर्द्धरात्रे तु पार्वति । भद्रकाली समुत्पन्ना ... ... ॥ अष्टम्यां भद्रकाली इस जय

म्यां पूजयेन्नरः । एकादश्यां न कुर्वीत पूजनं चापराजितम् । यदा तु पूर्वदिने श्रवणयोगाभावो वापरदिने वा श्र
।। ते योगिनी तदापरैव । उदये दशमी किंचित्संपूर्णैकादशी यदि । श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा ।। श्र
।यं निर्गलितार्थः । अपराह्णो मुख्यः कालः । तत्रैव पूजाद्युक्तेः । प्रदोषो गौणः । तत्र दिनद्वये अपराह्णव्यापित्वे
पूर्वप्रदोषव्याप्तेराधिक्यात् ।। दिनद्वये प्रदोषव्याप्तिपित्वे परा । अपराह्णव्यापित्वेराधिक्यात् श्रवणास्तु रोहि
णीवत् । दिनद्वये पराह्णस्पर्शे पूर्वा । तत्रापि परदिने ऽपराह्णे श्रवणात्त्वे परैवेति दिक् ।। अथ कार्त्तिकः
११ तुलासंक्रमणे प्रागपरा दश घटिकाः पुण्यः ।। कार्त्तिकस्नानः ।। तुलामकरमेषेषु प्रातःस्नानं विधीयते ।। ११
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ।। तत्र सौरमास उक्तः ।। प्रारभ्यैकादशीं शुक्लां आश्विनस्य तु मा
धवः ।। प्रातःस्नानं प्रकुर्वीत यावत्कार्त्तिकभास्करः । पूर्णे आश्वयुते मासि पौर्णमास्यां समाहितम् ।। का
र्त्तिकस्यासितेपक्षे त्रयोदश्यां निशामुखे । यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति ।। मंत्रस्तु ।। मृत्युना पाशदण्डा
भ्यां कालेन श्यामया सह ।। त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतां मम ।। कार्त्तिके कृष्णचतुर्दश्यां प्रभाते चन्द्रोदये ऽभ्यंगं
कुर्यात् ।। कार्त्तिके कृष्णपक्षे तु चतुर्दश्यां विधूदये ।। अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिः । इति नरकचन्द्रः ।।।

नेपूजयित्वा तु अर्द्धरात्रे ऽष्टमीषु च घातयेत् पशून् तथा ते भवंति महाबलाः। महानवमीपरदिने ऽपराह्णव्या
पिलेपरा अन्यथा पूर्वा। अर्चनं नात्पूर्वकाले नवम्यां स्यात्परे ऽहनि। दुर्गार्चीनं तत्र पूर्वेद्युः पूर्वाह्णे ष्टमीयदि ति
थिः। नन्दायां ज्वलते वह्निः पूर्णायां पशुघातनम्। भद्रायां गोकुलक्रीडा तत्र राज्यं विनश्यतीति। नवम्याम
पराह्णे तु बलिदानं प्रशस्यते। दशमी वर्ज्येत्तत्र नात्र कार्या विचारणेति। अथ बलिप्रमाणम्। एकाब्दलक्ष
णाञ्छागान्महिषांश्च विदुर्नृप। द्विवर्षावरं तथा पंच बलिदत्त्वेन घातयेत्। असमाप्तत्रिपक्षं हि पक्षिणां नैव
घातयेत्। इक्षुं रसविहीनं च कूष्माण्डं चाति कोमलम्। दुर्गायै बलिं नैव दद्यान्नृपपुंगवः॥ त्रिमा
सन्यूनं छागं च तथा मेषं वरानने। न बलिं च क्षणिकायै दद्यान्मनुसत्तमः। संपूर्णैकवर्षपशुं दुर्गायै वा
तयेद्बलिम्॥ अथ विजयदशमी॥ सा च द्वितीया दिने श्रवणायोगाभावे पूर्वाग्राह्या। तदुक्तं हेमाद्रौ
स्कंदे। दशम्यां तु नरैः सम्यक् पूजनीयापराजिता। ऐशानीं दिशमाश्रित्य अपराह्णे च प्रयत्नतः। या
र्थीनवमीयुक्ता न सा पूज्यापराजिता। क्षेमार्थं विजयार्थं वा पूर्वोक्तविधिना नरैः॥ नवमशेषसं
युक्तायां दशम्यामपराजिता। ददाति विजयं देवी पूजिता जयवर्द्धिनी। तथा। आश्विने शुक्लपक्षे तु

नानुजायां यमलोकं न पश्यति ॥ यमो यमुनया पूर्वं भोजितः स्वगृहे स्थितः ॥ अतो यमद्वितीयेयं त्रिषु लोकेषु
श्रुतः ॥ अस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः ॥ स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिमिच्छता ॥ दानानि च
देयानि भगिनीभ्यो विधानतः ॥ सर्वा भगिन्यः संपूज्या अभावे च प्रपन्नगाः ॥ कार्त्तिक शुक्ल द्वादश्यां रेवतीयो
गरहितां पारणां कार्य ॥ यदा तु रेवतीयोगरहिता द्वादशी सर्वेषां न लभ्यते तदा रेवत्याश्चतुर्थपादं वर्जयेत्
॥ मदनरत्ने ॥ एकादशी सोमयुता कार्त्तिके मासि भाविनि । उत्तराषाढसंयोगे अनंता प्रकीर्त्तिता ॥ अस्यां
१२ यत्क्रियते भद्रे सर्वमानन्त्यमश्नुते ॥ इति छोत्ति छ [illegible] गोविन्द त्यज निद्रां जगत्पते । त्वयि सुप्ते जगन्ना १२
थ जगत्सुप्तं भवेदिदम् ॥ उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव ॥ तत्र नामधा विपञ्चैर्यनिर्मलं प्र नंदह:१
निर्मलादिश ॥ कार्त्तिकपौर्णमासी पराग्राह्या ॥ अस्यां पौर्णमास्यां पुरे । तथा । आग्नेयं तु तथा नक्षत्रं का
र्त्तिक्यां भवति क्वचित् ॥ महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा ॥ यदा तु याम्यं भवति नक्षत्रं तस्यां ति
थौ क्वचित् ॥ तिथिः सापि महापुण्या मुनिभिः परिकीर्त्तिता ॥ प्राजापत्यं यदा नक्षत्रं तिथौ तस्यां नराधिप ॥
सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभा ॥ विशाखासु यदा भानुः कृत्तिकासु चन्द्रमाः । स योगः पद्मको

अथ कार्त्तिकअमावास्या ॥ अयं प्रदोषव्यापी ग्राह्या: । तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयो: । उल्काहस्ता नरा: कुर्युः पितॄणां मार्गदर्शनम् ॥ दिनद्वये सत्त्वे पर: । दण्डैकरजनीयोगे दर्श: स्यात्तु परेऽहनि । तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिकेति ॥ प्रदोषार्द्धरात्रिव्यापिनी मुख्या । एकैकव्याप्तौ परैव । अत्रैव दर्शेऽपररात्रेऽलक्ष्मीनि:सारणमुक्तं मदनरत्ने भविष्ये । एवं गते निशीथे तु जने निद्रार्द्धलोचने । तावन्नगरनारीभि: सूर्प्पडिंडिमवादनै: । नि:काश्यते प्रहृष्टाभिरलक्ष्मी: स्वगृहांगणात् ॥ कार्त्तिकशुक्लप्रतिपद्दि गोक्रीडनमुक्तम् ॥ अस्यामेव रात्रौ बले: पूजा ॥ पाकुहू: प्रतिपन्मिश्रा तत्र गा: पूजयेन्नृप ॥ पूजनाच्छ्रीरिवर्द्धन्ते प्रजा गावो महीपति: ॥ तथा । प्रतिपच्चाग्निकरणां द्वितीयायां तु गोऽर्च्चनम् । छत्रच्छेदं करिष्येते विनाशं कुलक्षयम् । पूर्वदिने प्रतिपद: सायान्हव्यापित्वे द्वितीयदिने ज्ञेया: । गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमा: ॥ सोमो राजा पशून् हंति सुरभि: पूजकांस्तथा । दिनद्वये सायान्हव्यापित्वे तु परैव ग्राह्या । वर्द्धमानातिथौ नंदा यदा सार्द्धत्रियामिका । द्वितीया वृद्धिगामित्वादुत्तरा यत्र नोच्यते ॥ यमद्वितीया तु प्रतिपद्युता ग्राह्येत्युक्तम् । निर्णयामृतादौ । यमद्वितीयापराह्णव्यापिनी पूर्वविद्धा चेति हेमाद्रि: ॥ ऊर्जे शुक्ले द्वितीयायामपराह्णे ... ऽर्चयेद्यमम् । स्नानं कु

लसर

।वास्यपोऽश्वजीवेन्दोर्महामाघीतिकथ्यते ।मेषषष्ठेपक्षशौरिः सिंहेचगुरुचन्द्रमाः ।भास्करःश्रवणर्क्षेचमहामाघीति
शस्यते ॥अथफाल्गुनचतुर्दशीशिवरात्रिः ।साचप्रदोषव्यापिनीग्राह्येति ।केचुचिन्निशीथव्यापिनी ॥त्रयोदश्य
स्तगेसूर्ये चतस्रष्वेवनाडिषु ॥भूतविद्धातुयातत्रशिवरात्रिव्रतंचरेत् ।भवेद्यत्रत्रयोदश्यांभूतव्याप्तामहानिशि ॥
शिवरात्रिव्रतंतत्रकुर्य्याज्जागरणंतथेति ॥अर्द्धरात्रादधश्चोर्द्धंयुक्तायत्रचतुर्दशी ॥तत्तिथावेवकुर्वीतशि
वरात्रिव्रतंव्रती ।नार्द्धरात्रादधश्चोर्द्धंयुक्तायत्रचतुर्दशी ।नैवतत्रव्रतंकुर्य्यात्आयुरारोग्यहानितः ॥अर्द्ध
१३ रात्र [illegible] तीयदामान्यततीययामाघवटीद्वयं [illegible] पद्रतिमाजव ॥एवंसतिपूर्वेद्युरेवोभयव्याप्तौपूर्वैव १३
त्रयोदशीयदादेवी दिनभुक्तिप्रमाणतः ॥जागरेशिवरात्रिःस्यान्निशिपूर्णाचतुर्दशी ।दिनभुक्तिरत्त
नयः ॥जयंतीशिवरात्रिश्चकार्य्येभद्राजयान्विते ॥दिनद्वयेनिशीथव्याप्तौतुहेतोमादिमतेपूर्वा ॥अर्द्धरा
त्रात्पुरस्ताच्चेज्जयायोगोयदाभवेत् ।पूर्वविद्धैवकर्त्तव्याशिवरात्रिःशिवप्रियैरिति ॥अथफाल्गुनपौर्णमा
स्यांहोलिका ॥साचसायाह्नव्यापिनीग्राह्या ॥सायाह्नेहोलिकांकुर्य्यात्पूर्वाह्ने क्रीडनंगवामिति ॥प्रदोषव्या
पिनीग्राह्यापौर्णिमाफाल्गुनीसदा ॥तस्यांभद्रामुखंत्यक्त्वापूज्याहोलानिशामुखे ।यथा ॥श्रावणी

B

नामपुष्करेष्वपदुर्लभः॥ अथमार्गादिरविवारेकाम्यव्रतम्॥ पत्रंत्रितयंतुलस्याश्चत्रिपलमपच्युतं मार्गशीर्षादिभ
स्यंमुष्टी नांत्रितिजानांत्रिपलंदधितथाकुशंगोमयंपंच॥ त्रितयंतोपाञ्जली नांत्रिमरिचकमथोत्रिःपलाः शक्तयः स्यु
र्गोमुत्रेसर्करासद्भिरितिविधिनाभानुवारक्रमेण॥ अथयोगअमावास्यामर्द्धयोगविशेषः॥ अमार्कपात
श्रवणैर्युक्ताचेत्पौषमाघयोः॥ अर्द्धोदयःसविज्ञेयः कोटिसूर्यग्रहैःसमः॥ तथा॥ दिवैवयोगःशस्तोयंनतुरात्रौ
कदाचनेति। केचित्तु। किंचिदूनोमहोदयइत्याहुस्तन्निर्मूलं॥ माघामायांव्यतीपाते॥ अर्द्धोदयंतदित्याहुःसहस्रा
र्कग्रहैःसमम्॥ माघमासेकृष्णपक्षेपंचदशपांरवेर्दिने॥ वैष्णवेनतुऋक्षेण॥ व्यतीपातेसुदुर्लभे॥ अर्द्धोदयेनसंप्राप्ते
सर्वंगंगासमंजलम्॥ शुद्धात्मानोद्विजास्सर्वेभवेयुर्ब्रह्मसंमिताः॥ यत्किंचिद्दीयतेदानंतद्दानंमेरुसंभवमिति
॥ मकरसंक्रांतौहेमाद्रिमतेपराश्चत्वारिंशद्घटिकाःपुण्याः॥ माधवमतेतुविंशतिःपराः॥ पश्चानुसूर्यास्तात्पूर्वं
संक्रांतिर्भवतितदामपममतेपूर्वमेवपुण्यकालः॥ रात्रौतुप्रदोषेनिशीथेवामकरेसंक्रमेमाधवमते द्वितीयदिनएव
पुण्यम्॥ पुण्यस्तासमप्येवेलायांमकरंयातिभास्करः॥ प्रदोषेवार्द्धरात्रेवास्नानंदानंपरे[illegible]हनि॥ पूर्वापरवि
भागेनरात्रौसंक्रमणंप्रभो॥ दिनान्तेपंचनाडीस्तुतदापुण्यतमाःस्मृताः॥ माधवीयपुष्पेमापरेत्युक्तम्॥ प्राक्॥

॥ स्तु शुध्यन्ति प्रेतसूतके ॥ त्रिरात्रेणासकुल्याश्च स्नानमात्रेण गोत्रजाः ॥ सपिण्डाः सप्तपुरुषावधयः । सकुल्या दश
पुरुषावधयः ॥ तदूर्ध्वं गोत्रजाः । रात्रावेव समुत्पन्ने मृते रजसि सूतके ॥ पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविः ॥ उदितेच त
र्ध्वं नारीणां दृश्यते रजः जननं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी । पारस्करः ॥ शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमि
पाः ॥ वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यति ॥ अथ बालाशौचम् । पारस्करः ॥ आदन्तजननात्सद्यः आचूडान्नै
शिकी स्मृता ॥ त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् । अनतीतद्विवर्षस्तु प्रेतो यत्र च दह्यते ॥ अशौचं ब्राह्मणा
नां तु त्रिरात्रं तत्र विधीयते ॥ राज्ञामेकादशाहं तु वैश्यानां द्वादशाहिकम् ॥ अपि विंशतिरात्रं तु शूद्राणां भ
१४ वति क्रमात् ॥ अथ प्रसूतागोशुद्धिः ॥ अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ॥ दशरात्रेण शुध्यन्ति भूमिस्थं १४
च नवोदकम् ॥ अथ सपिण्डाशौचम् ॥ सपिण्डमरणे दशरात्रमाशौचं ॥ अष्टमपुरुषादारभ्य चतुर्दशपुरुषं यावत्सकुल्य
मरणे त्रिरात्रम् ॥ तदूर्ध्वं तापमानं नाम जन्मपरंपरा कल्पाति मरणे पक्षिणी ॥ अत्रापमाननामपरंपराके अ
स्मद्गोत्रज इत्येवमाकारमात्र ज्ञानगोचरे ते स्नानमात्रम् ॥ अथ गर्भस्रावाशौचं ॥ अंगिराः ॥ षण्मासाभ्यंतरं
यावद्गर्भस्रावो भवेद्यदि ॥ तदा मासस्तमैस्तासां दिवसैः शुद्धिरिष्यते ॥ अत ऊर्ध्वं स्वजात्युक्तमशौचं तासु विद्यते ॥
सद्यः शौचं सपिण्डानां गर्भस्य पतने सति ॥ अत्र दिवसेरिति ॥ तेन तृतीयमासोपरि षण्मासपर्यंतं यावन्तो

14

दुर्गानवमी दूर्वा चैव हुताशिनी ॥ पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति ॥ दिनद्वये प्रदोषव्याप्तौ परैव ॥ पूर्वदिने
भद्राप्राप्तत्वात्तत्र होलिकानिषेधात् । तथा । भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा । श्रावणी हंति राजानं ग्रा
मं दहति फाल्गुनी ॥ तथा ॥ दिनार्धात्परतो पि स्यात् फाल्गुनी पूर्णिमा यदि । रात्रौ भद्रावसाने तु होलिकां दीप
येत्तदेति । वह्नौ चूर्णं परित्यजेदिति ॥ चैत्रकसंप्रतिपत्स्थितं तोत्सवः । सा चौदयिकी ग्राह्या । दिनद्वये तथैव पूर्वा ॥
वत्सरादौ वसंतादौ बलिराज्ये तथैव च ॥ पूर्वविद्धैव कर्त्तव्या प्रतिपत्सर्वदा बुधैरिति । इति फाल्गुनमासः
अथ ग्रहणादोषमाह ॥ जन्मसप्ताष्टरिःफाङ्क दशमस्थे निशाकरे ॥ दृष्टो रिष्टप्रदो राहुर्जन्मर्क्षे निधने
पि च ॥ अर्कः षट्दशराशिः ॥ अङ्को नवमः ॥ निधनं सप्तमस्तारा । उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ॥
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ॥ अथ ग्रहणात्पूर्वं भोजननिषेधे विशेषमाह ॥ सूर्यग्रहे तु नाश्नीया
त्पूर्वं यामचतुष्टयम् । चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धातुरान्विना इति । अथ मौननियमः ॥ उच्चारे
मैथुने चैव प्रस्रावे दन्तधावने ॥ स्नानभोजनकाले च षट्सु मौनं समाचरेत् ॥ अथ समा[illegible]कोचम् ॥
कु. रादेव कर्त्तव्यः संयोगो यस्य नाग्निना ॥ दाहादूर्ध्वमशौचं स्यात् । तत्र वै तानि कोविधिः ॥ कश्यपः ॥ दशाहेन

ना सु विशेषमाह ॥ स्त्रीणां नारीणि तुर्ये हे सूपते म्रियते पिता ॥ षण्मासौचं चरेत्सम्यक् पक्षस्यान व्यवस्थिता
दंधुवर्गास्तथैकेन शुध्यते जनकास्त्रिभिः ॥ तदिदमत्र व्यवस्था ॥ स्त्रीपदि पितृगृहे प्रसूयते म्रियते च तदा नातापित्रोस्त्रि
रात्रम् ॥ एकग्रामवासिना मातापितृव्यादिना मे काहो रात्रम् ॥ भिन्नग्रामवासिनां तु भ्रात्रादीनां मशौचाभाव
एव ॥ ग्रंथदोषविषयगो चरः ॥ दाहच्छेदशिरोभेदे प्रपतेनुपकुर्वताम् ॥ नराणां गो हितार्थाय प्रायश्चित्तं न
विद्यते ॥ पाराशरः ॥ गुर्विणीषु वहमानेषु दत्ता मिहतेषु च ॥ मूर्छितश्च पदं गच्छेत् संचसप्त दशापि वा ॥ ग्रासं वा
१५ पाद्य ऊर्ध्वतो पानीयं पिबतिस्वयम् ॥ पूर्वव्याधि विनष्टानां प्रा- -यश्चित्तं न विद्यते ॥ शृंगभंगेऽस्थिभंगे वा १५
कटिभंगे तथैव च ॥ यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते ॥ हले शाकटे चैव दुर्बलं योऽभियोजयेत् ॥
प्रसवाये समुत्पन्ने तत्र प्राप्नोति गोवधम् ॥ पितुराशौचमब्दं स्यात्तदर्द्धं मातुरेव हि ॥ मासत्रयं तु भार्यायास्त पा०
दर्द्धं भ्रातृपुत्रयोः ॥१॥ नारदः ॥ पुत्रोद्वाहात्परं पुत्री विवाहो न ऋतुत्रये ॥ न तयोर्व्रतमुद्वाहान्मुण्डनादपि मुण्ड
नम् ॥ अथ महानिशा ॥ मध्यमयामयोर्मध्यमिति द्वितीययामस्यान्त्य घटिकाद्वयं ततीययामस्याद्य घटिकाद्वयमि
ति चतस्रो नाडिका महानिशा ॥ तदुक्तं तेनैव ॥ प्रातः संध्या त्रिनाडी स्यात्सायं संध्या चतुर्दशी ॥ महानिशा तु

15

मासाद्व्यतीतास्तावंति दिनानि तासां स्त्रीणां ब्राह्मण्यादीनामशौचम् ॥ सपिंडानां तु स्वामिपुत्रादीनां सद्यःशौचमेव
अथ विदेशस्थाशौचम् ॥ तत्र मनुः ॥ विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् ॥ यच्छेषं दशरात्रस्य तावदेवाशुचि
र्भवेत् ॥ अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् ॥ संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति ॥ यद्देशमरणो
नच्छिन्नया नैव प्राप्यते स विदेशः ॥ अथाधिकारिणः ॥ मनुः पितुः पुत्रेण क्रिया कार्या प्रयत्नतः ॥ बहवः स्युर्यदा पुत्राः
पितुरेकत्रवासिनः ॥ सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव यत्कृतम् ॥ द्रव्येण चाविभक्तेन सर्वैरेव तं भवेत् ॥ तत्राप्यौरस
मुख्यतया अधिकारः ॥ तदभावे तु पुत्रिकापुत्रस्य ॥ तयोरभावे क्षेत्रजादीनामधिकारः ॥ तथा ॥ आज्यं
विना पयःपाने लं सन्धिः प्रतिनिधीकृतम् ॥ तथैकादशपुत्राणां तु पुत्रिकौरसयोर्विना ॥ अथान्यसु[illegible] ॥ बृहस्पतिः
तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे ॥ नगरग्रामदाहे च स्पृष्टमस्पृष्टं न दुष्यति ॥ शंखः ॥ पितुः पुत्रेण
कर्तव्या पिंडदानोदकक्रिया ॥ पुत्राभावे तु पत्नी स्यात्तदभावे सहोदरः ॥ भार्या पिंडं पतिर्दद्यात् भर्त्रे भार्या त
थैव च ॥ अथ कन्यामरणाशौचम् ॥ सर्ववर्णानां द्वितीयवर्षान्तं यावत्कन्यामरणे सद्यःशौचं ॥ तदुपरि वि
वाहपर्यन्तमेकाहात्रम् ॥ विवाहानन्तरं [illegible] कुले शौचं [illegible] स्वामिकुले संपूर्णमशौचम् ॥ विवा

मचक्रे ॥ सकृत्स्पदेयाज्जलजं वै भूमौ शेषाणि दानानि पप्पा विप्रहस्ते ॥ विवाहे सर्वमांगल्ये चौलादौ व्रतबंध
तचन्द्रे नैव चिंत्य इति पाराशरो ऽब्रवीत् ॥१ विवाहचौलव्रतबंध यज्ञे पट्टाभिषेके च तथैव राज्ञाम् ॥
मन्त्र या त्रासु तथैव जाते नो छिन्नमोपः खलु बालचन्द्रः ॥ तानां वा । त । तयं सपत्निजननी मातामहादि
पंस विछौ तनपादि तातजननी स्वभ्रातरः सक्षिपः तातान्यात्मभगी न्यपसच ध वयुक् जाया पिता
सद्गुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे तपालर्य्यरो ॥१॥ सीमन्ते च विवाहे च चतुर्थी सहभोजने ॥
व्रतेदानेमखेश्राद्धे पत्नीतिष्ठति दक्षिणे ॥२॥ सुमङ्गल्यांपात्रापां वितान्वारोहणे पि च ॥ शय्यायांयामतः
पत्नी तीर्थे पत्ते च दक्षिणे २॥ योगिनीतंत्रे ॥ ग्रहणे च महातीर्थे नास्ति कालस्य निर्णयः ॥ तथा गंगायां
भास्करे तेत्रे विरजे चन्द्रपर्वते महाविपासु कालादि विचारो नास्ति निश्चितम् ॥१॥ र[illegible]
सूर्यस्य ग्रहणे तथा ॥ तत्र लग्नादिकं किंचिल्लवि चार्य्यकथं चन ॥ रविसंक्रमणे चै[illegible]
भवेत् ॥ नवरात्रे पमासादि शो धनं सूर्यपर्वणि ॥ एवं चन्द्रग्रहणेपि । पत्तनपि[illegible]
तथा परम् ॥ त्रिभिर्मुहूर्तैर् [illegible] मध्ये विधि स्मृतः ॥ वा हे [illegible]

पंसेशाचनन्तो बहिकास्तुपारः ति। अथ दैवे पित्र्ये कालमाह॥ पूर्वाह्णे दैविकं कर्म अपरा
ह्णं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम्॥२॥ अथ श्राद्धाहे निषेधः॥ श्राद्धाहे च दशम्यां च द्वादश्यां
श्चैव पर्वणि तैलं मांसं विवर्जयेत्॥३॥ अन्यच्च। दन्तधावनताम्बूलं स्निग्धस्नानमभोज
रान्नं च श्राद्धकृत्सर्ववर्जयेत्॥४॥ अमावास्यायामपरपक्षे च मृतानां पार्वणं सम्यग्नैकोद्दिष्टम्
अमायां चापरपक्षे मृतप्रेतपदे स्वधापदि॥ पार्वणं तत्र कर्त्तव्यं नैकोद्दिष्टं कदाचने ति॥५॥ आमश्राद्धं तु पूर्वाह्णे
एकोद्दिष्टं तु मध्यतः। पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकम्॥ अथ मेषादिसंक्रान्तौ विशेषपुण्यकालः॥ मेषे
प्राग्रूर्ध्वं च दश नाड्यः पुण्यकालः॥ वृषे पूर्वाः षोडश मिथुने पराः षोडश। कर्के पूर्वास्त्रिंशत्। सिंहे पूर्वाः
षोडश कन्यायां पराः षोडश। तुलायां प्रागूर्ध्वं दश। वृश्चिके पूर्वाः षोडश। धनुषि पराः षोडश॥ मकरे चत्वारिं
शत्पराः। इदं च हेमाद्रिमते नोक्तम्॥ माधवमते तु तत्र पराः विंशतिपुण्याः॥ कुंभे पूर्वाः षोडश मीने पराः षोडश
दृति संक्रान्तिनिर्णयः॥ अथ संक्रान्तिदिने सहस्रस्य उपवासनिषेधः॥ आदित्येऽहनि संक्रान्तौ ग्रहणे
सूर्यचन्द्रयोः। उपवासो न कर्त्तव्यः पुत्रिणा गृहिणा तथा॥१॥ गजस्कन्धे तुरगस्य कर्णे गवां च पुच्छे महिषी च शृं
प्रजाविकादिस्तननामिमध्ये॥ व‍‍ ... ... पत्नी हलाग्रकोटि

॥ [illegible] ॥

निलापचाः कलापकं कंमुनीचारावास्तुकं हिलमोचिकाषष्ठिकाकालशाकंच मुलकं केमु.केतरनलयने सैंधव
नामुद्रे त्रे वदधिसर्पिर्विषी पपोनु [illegible] सारं च पनसाम्र हरीतकी ॥ तित्तिडि जीरके चैव नागरं [illegible] गजपिप्पलि
कदली लवली धात्रीफलान्यगुडमैक्षवम् ॥ अतैलपकं मुनयो हविष्यान्नं प्रचक्षते ॥१॥ समिधपुष्पकु
श [illegible] ग्निमर्दन्नातत्तपानिकः ॥ जपं होमं च कुर्वाणो नाभिवाच्यो द्विजः स्मृतः ॥ सप्ताहाद्वा विसप्ताहाद्वा
[illegible]स्पान्नि नैवजायते ॥ पुत्रदारधनानां च सख्यं समये ध्रुवम् ॥ [illegible] ॥ पदाचापि जीवो भवति
धनराशौ दिनमणिलपातारा [illegible] सभवननगतो फाल्गुन शितेयदा कौश्चाद्यपांप [illegible] भशोभन
पुतं तदा गोविन्दा [illegible] हरिदिवसमस्मिन्भुवितले ॥१॥ यदाचिद्योगोयं परमपुनुषापैक निलये जगन्नाथ
क्षेत्रे मिलति य दि [illegible]पोद्यवशात् ॥ नरस्तत्र स्नात्वा व्रजति सहसा कृसपद्वीं सुरेन्द्रैर्दुष्पापामिह हि
पापापि नितराम् ॥२॥ [illegible] ॥ कुंभेऽर्के देवपूज्ये [illegible] शीतगोः [illegible] कृतस्ये प
[illegible] फाल्गुने मास्यपक्षशुभफलदे शोभने [illegible] सम्पते ॥ येत्स्या [illegible] जलधितटे द्वादशी विश्रुता
[illegible] कलिकलुष [illegible] हरा [illegible] सायुज्यदात्री ॥ [illegible] नितंतिमे ॥ गोविन्दद्वादशी

शक्रस्य च प्रसादतः ७ श्रीसूत उवाच राजेन्द्र महाराजं हरिश्चन्द्रं कृपानिधिम् अयोध्यानगन
गरीं गत्वा नृपस्य समागतः ८ तेनैव राजा वनं जातो मृगयां याति नित्यशः स कदाचित् हरिश्चन्द्रो मृगान् हन्तुं
प्रचक्रमे ९ मायामृगी वनान्ते स्थाने निर्गतः शूकरो महान् तं गत्वा शीघ्रगं कृत्वा तं राजा प्रत्यद्रवत् १०
योजनानां शतं गतः शूकरपृष्ठतः मायया नृपो गतः कालस्तत्र सरासात्(?) त्यपासह ११ हरिश्च
न्द्रोऽपि तत्रैव दृष्टवान् ददर्श ह जलेन परिपूरितां सीतैः पद्मिनीखण्डमण्डिताम् १२ तत्र स्नात्वा च
तुरंगाद्वतीर्य सत्तमं समागतान् विश्वामित्रः समागतः कृपणानस्य संनिधौ १३ वन्दितस्तेन रा
ज्ञा वै वा

18